वित्ताप्तिरनिर्वाणं धनागमो म्लुसम्पदोऽखलम् ।
ऐश्वर्य्यम्लुराध्यानि च क्रमात्त्रिंशदिति यावत् ॥
परतो न विशेषफलं विषमसमस्थास्तु पाप-
शुभफलदाः ।
केचिद्दफलाः प्रदिष्टास्त्रिंशत्परतोऽयमितियावत्॥
करवीरोत्पलगजमदघृतकुङ्कुमकुन्दचम्पकसगन्धाः।
शुभदोऽनिष्टो गोमूत्रपङ्कमेदःसदृशगन्धः ॥
कूर्म्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गन्धः।
वैदूर्य्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः ॥
इदमौशनसं च शस्त्रपानं
रुधिरेण श्रियमिच्छतः प्रदीप्ताम् ।
हविषा गुणवत्सुताभिलिप्सोः
सलिलेनाक्षयमिच्छतश्च वित्तम् ॥
वडवोष्ट्रकरेणुदुग्धपानं
यदि पापेन समीहतेऽर्थसिद्धिम् ।
झषपित्तमृगाश्ववस्तदुग्धैः
करिहस्तच्छिदये सतालगर्भैः ॥
आर्कं पयो हुडुविषाणमषीसमेतं
पारावताखुशकृता च युतं प्रलेपः ।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥
क्षारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत् ।
सम्यक् छितं चाश्मनि नैति भङ्गं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम् ॥")

खड्गकोषः, पुं, खड्गलता । तत्पर्य्यायः । खड्गपत्रः २ खड्गिमारः ३ अश्वपुच्छकः ४ । इति शब्दचन्द्रिका ॥ (खड्गस्य कोषः ।) खड्गाधारः । खाप इति भाषा । अयं व्युत्पत्तिलभ्योऽर्थः ॥

खड्गटः, पुं, (खड्ग इव अटतीति । अट्+अच् । शकन्ध्वादित्वात् साधुः ।) बृहत्काशः । इति
ली ॥

खड्गधेनुः, स्त्री, खड्गपुत्त्रिका । छुरि इति भाषा । (खड्गस्य गण्डकस्य धेनुः पत्नी ।) गण्डकस्त्री । इति मेदिनी ॥ मादी गण्डार इति भाषा ॥

खड्गपत्रः, पुं, (खड्गाकाराणि पत्राणि अस्य ।) खड्गलता । इति शब्दचन्द्रिका ॥

खड्गपिधानं, क्ली, (खड्गस्य पिधानमाच्छादनम् ।) खड्गकोषः । खाप इति भाषा ।
हलायुधः ॥

पिधानकं क्ली (खड्गस्य पिधानकम् ।) खड्गपिधानम् । खाप इति भाषा । तत्पर्य्यायः । प्रत्याकारः २ परीवारः ३ कोशः ४ । इति हेमचन्द्रः ॥

खड्गारीटः, त्रि, (खड्गं कर्त्तीति । कृ+कीटन् । निपातनात् पूर्व्ववृद्धिः । यद्वा खड्गारिरिवाचरति इति । क्विः ततः कीटन् ।) फलकः । असिधाराव्रतधारी । इति मेदिनी ॥

खड्गिकः, पुं, महिषीक्षीरकेनः । शौनिकः । इति मेदिनी ॥

खड्गिमारः, पुं, (खड्गिनं गण्डकं मारयतीति । मृ+णिच् "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । अस्त्रविशेषः ।) खड्गकोषलता ॥ इति शब्दचन्द्रिका ॥

खड्गी, [न्] पुं, (खड्गस्तदाकारं शृङ्गमस्यास्तीति । इनिः ।) वनजन्तुविशेषः । गण्डार इति भाषा । तत्पर्य्यायः । गण्डकः २ खड्गः ३ । इत्यमरः ।२।५।४॥ खड्गमृगः ४ क्रोडीमुखः ५ तुङ्गमुखः ६ बली ७ वज्रचर्म्मा ८ वार्ध्रीनसः ९ । इति राजनिर्घण्टः ॥ एकचरः १० गणोत्साहः ११ । इति त्रिकाण्डशेषः ॥ गण्डः १२ खनोत्साहः १३ । इति शब्दरत्नावली ॥ अस्य मांसगुणाः । बलकारित्वम् । बृंहणत्वम् । गुरुत्वम् । इति राजनिर्घण्टः ॥ कफवायुनाशित्वम् । कषायत्वम् । पित्तलोकत्वमिकारित्वम् । पवित्रत्वम् । आयुर्हितत्वम् । मूत्रबन्धकारित्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥
("कफघ्नं खड्गिपिशितं कषायमनिलापहम् ।
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् ॥"
इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमेऽध्याये ॥
महादेवः । यथा, महाभारते ।१३।१७।४२।
"अग्नी शतघ्नी खड्गी पट्टिशी चायुधी
महान् ॥"
खड्गो विद्यतेऽस्य इति व्युत्पत्या तु वाच्यलिङ्गः । यथा, भागवते । ८।२५।८ ।
"सुसन्नधरोऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः ॥")

खड्गीकं, क्ली, (खड्गस्तत् कर्म्मणि कुशलम् । बाहुलकात् ईकः ।) दात्रम् । इति शब्दरत्नावली ॥

खण्डं, क्ली, (खडि+घञ् । इदित्वात् नुम् ।) विड्लवणम् । इति राजनिर्घण्टः ॥ इक्षुविकारः । अस्य गुणाः । वृष्यतमत्वम् । चक्षुष्यत्वम् ॥ वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥
(अस्य गुणा यथा,—
"खण्डन्तु मधुरं वृष्यं चक्षुष्यं बृंहणं हिमम् ।
वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम् ॥"
मधुखण्डगुणाः यथा,—
"मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः ।
छर्द्यतीसारतृड्दाहरक्तघ्नी तुवरा हिमा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

खण्डः, पुं,क्ली, (खडि+घञ् इदित्वात् नुम् ।) एकदेशः । तत्पर्य्यायः । भित्तम् २ शकलम् ३ । इत्यमरः ।१।३।१६ ॥ (यथा, मार्कण्डेये ।८३।२६ ।
"धुतशृङ्गविभिन्नाश्च खण्डखण्डं ययुर्घनाः ॥"
अजादिसमूहः । इत्यमरः । १ । १० । ४२ ॥)

खण्डः, पुं, (खडि+घञ् ।) इक्षुविकारः । खाँड़ इति भाषा । मणिदोषः । इति मेदिनी ॥ (योगिविशेषः । यथा, हठयोगदीपिकायाम् ।१।८ ।
"भानुकीनारदेवश्च खण्डः कापालिकस्तथा ॥")

खण्डकः, पुं, (खण्डेन निर्वृत्तः इति संज्ञायां कः ।) निर्नखः । इति शब्दचन्द्रिका ॥ सिताखण्डः । इति राजनिर्घण्टः ॥ (खण्डयतीति । खडि+ण्वुल् । छेदकारी ॥)

खण्डकथा, स्त्री, (खण्डा खण्डिता कथा ।) वाङ्मयभेदः । इति त्रिकाण्डशेषः ॥

खण्डकर्णः, पुं, (खण्ड इव कर्णः कन्दो यस्य ।) आलुविशेषः । शकरकन्द आलु इति भाषा ॥ तत्पर्य्यायः । वज्रकन्दः २ । इति रत्नमाला ॥ अस्य गुणाः । कफपित्तनाशित्वम् । कटुपाकित्वम् । इति राजवल्लभः ॥

खण्डकालु, क्ली, (खण्ड इव कायतीति । कै+कः । ततः खण्डकं आलु इति कर्म्मधारयः ।) आलुविशेषः । इति शब्दचन्द्रिका ॥

खण्डजः, पुं, (खण्ड इव जायते खण्डाकारेण जायते वा । जन्+डः ।) गुड़ः । यवासशर्करा । इति राजनिर्घण्टः ॥

खण्डजोद्भवः, पुं, (खण्डज उद्भवोऽस्य इति खण्डजोद्भवः तस्माज्जायते इति । जन्+डः ।) नवराजोद्भवखण्डः । इति राजनिर्घण्टः ॥

खण्डतालः, पुं, (खण्डेन वाद्यांशभेदेन निर्वृत्तस्तालः ।) तालविशेषः । यथा,—
"द्रुतमेकं भवेद्यत्र खण्डतालः स उच्यते ।
अपरं नियमं विना ।"
इति सङ्गीतदामोदरः ॥

खण्डधारा, स्त्री, (खण्डे एकदेशे धारा यस्याः ।) कर्त्तरी । इति शब्दमाला ॥ काँचि इति भाषा ॥

खण्डनं, क्ली, (खडि भावे+ल्युट् ।) भञ्जनम् । भेदनम् । निराकरणम् । छेदनम् । यथा,—
"घटय भुजबन्धनं जनय रदखण्डनं देहि पदपल्लवमुदारम् ॥" इति जयदेवः ॥

खण्डपरशुः, पुं, (खण्डयति शत्रून् इति खण्डस्तादृशः परशुरस्य ।) शिवः । इत्यमरः ।१।१।३३॥
(यथा, महाभारते ७ । रुद्रमाहात्म्ये ।२००।४१ ।
"पिनाकिनं खण्डपरशुं लोकानां पतिमीश्वरम् ॥"
विष्णुः । यथा, महाभारते ।१३।१४९।७४ ।
"सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ॥")

खण्डपर्शुः, पुं, (शत्रून् खण्डयति विदारयति इति खण्डस्तथाविधः पर्शुरस्य ।) परशुरामः । शिवः । चूर्णलेपी । खण्डामलकभैषज्यम् । राहुः । इति मेदिनी ॥ भग्नदन्तहस्ती । इति शब्दरत्नावली ॥

खण्डपालः, पुं, (खण्डं पालयतीति । पालि+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) मोदकः । मयरा इति भाषा । तत्पर्य्यायः । खाण्डिकः २ । इति हारावली ॥

खण्डमोदकः, पुं, (खण्डेन खण्डोत्पादितलड्डुकादिना वा मोदयतीति । खण्ड+मुद्+णिच्+ण्वुल् ।) यवासशर्करा । इति राजनिर्घण्टः ॥

खण्डलवणं, क्ली, (खण्डते इति खण्डम् । खडि+कर्म्मणि घञ् । तच्च तत् लवणञ्चेति ।) विड्लवणम् । इति राजनिर्घण्टः ॥ (विड्शब्देऽस्य विवरणं ज्ञातव्यम् ॥)

खण्डशाखा, स्त्री, (खण्डा खण्डिता शाखा अस्याः ।) महिषवल्ली । इति राजनिर्घण्टः ॥

खण्डसरः, पुं, (खण्ड इव सरतीति । सृ+अच् ।) यवासशर्करा । इति राजनिर्घण्टः ॥